# ĀRYA ADVAYAŚATIKĀ PRAJÑĀPĀRAMITĀ SŪTRA
# आर्य अद्वयशतिका प्रज्ञापारमिता सूत्र

This short *sūtra* is an excerpt from the *dhāraṅī saṁgraha* (folios 13b-14b) compiled by late Panḍīta Ratna Bahadur Bajracharya of Bubahal, Lalitpur. This collection consists of more than six hundred titles comprising *dhāraṅīs* and smaller *sūtras*. In subsequent issues of our journals we are planning to publish them. We are giving below some description of this *dhāraṅī saṁgraha*.

Folios: 246 Script: Newari
Lines: 11 Size: 44cm X 16cm
Material: Nepalese Yellow paper Condition: Fine
Language- Sanskrit and Newari
Beginnings- "Om Namo Mahāmañjunāthāya
Atha vajradhara śrī māna dūrdanta damakaḥ para .................
Colophon: Ye dharmā hetu prabhavā.................

नमो भगवत्यै आर्यप्रज्ञापारमितायै ॥

एवं मया श्रुतम्। एकस्मिन् समये भगवान् राजगृहे विहरतिस्म गृध्रकूटे पर्वते महता भिक्षुसंघेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैरनेकैर्ब्रह्मशक्रलोकपालैर्देवनागयक्षगन्धर्वासुरगरुडकिन्नरमहोरगैरूपासकोपासिकाभिः सार्धम्।

तत्र खलु भगवान् आयुष्मन्तं सुभूतिंमामन्त्रयते स्म। ये केचित् सुभूते श्रावकमार्गः शिक्षितुकामेन प्रज्ञापारमिता श्रोतव्या उद्गृहीतव्या धारयितव्या वाचयितव्या (देशयितव्या) पर्यवाप्तव्या। इहैव प्रज्ञापारमितायामुपायकौशल्य समन्वागतेन बोधिसत्त्वेन महासत्त्वेन सर्वबुद्धधर्मसमुदागमाय योगः करणीयः। तत्कस्य हेतोः ? इह प्रज्ञापारमितायां विस्तरेण सर्वबुद्धधर्मा निर्दिष्टाः। यत्र बोधिसत्त्वेन शिक्षितव्यम् , ये केचित् सुभूते कुशलधर्मा बोधिपक्षाः श्रावकधर्मा वा प्रत्येक बुद्धधर्मा वा बोधिसत्त्वधर्मा वा बुद्धधर्मा वा। बोधिपक्षाः श्रावकधर्माः प्रत्येकबुद्धधर्म बोधिसत्त्वधर्मास्त्वं ते प्रज्ञापारमितायामन्तर्गतामनुप्रविष्टाः संग्रकसम-वसरणं गच्छन्ति। भगवानाह - तद्यथा सुभूते दानपारमिता शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपारमिता प्रज्ञापारमिता[१]। अध्यात्मशून्यता वहिर्धाशून्यता अध्यात्मवहिर्धाशून्यता शून्यता शून्यता महाशून्यता परमार्थशून्यता संस्कृतशून्यता असंस्कृतशून्यता अत्यन्त शून्यता अनवराग्रशून्यता अनवकार-शून्यता प्रकृतिशून्यता सर्वधर्मशून्यता स्वलक्षणशून्यता अनुपलम्भशून्यता अभावशून्यता स्वभावशून्यता

[१] इति षटपारमिताः।

अभावस्वभावशून्यता[२]। चत्वारि स्मृत्युपस्थानानि। चत्वारि सम्यक्प्रहाणानि। चत्वारि ऋद्धिपादानि। पञ्चेन्द्रियाणि। पञ्चबलानि। सप्तबोध्यङ्गानि। आर्याष्टाङ्गिकमार्गाः[३]। चत्वारि ध्यानानि। चत्वारि प्रमाणानि। चतस्त्र आरूप्यसमापत्तयः। अष्टौ विमोक्षाः। नवानुपूर्वविहारसमापत्तयः। सर्वधारणीमुखानि। दशतथागत-बलानि। चत्वारि वैशारद्यानि। चतस्त्रः प्रतिसंविदः। महामैत्री महाकरुणा। अष्टादशावेणिकबुद्धधर्माः श्रोतापत्तिफलं सकृदागामिफलं अनागामिफलं सर्वज्ञता[४] च[५]।

इयमेव सुभूते कुशलधर्मा बोधिपक्षाः श्रावकधर्माः प्रत्येकबुद्धधर्मः। यत्र प्रज्ञापारमितायामन्तर्गता अनुप्रविष्टाः संग्रहसमवसरणं गच्छन्ति।

सुभूतिराह - अहो ! अहो ! दुरवगाहा वतेयं प्रज्ञापारमिता। यत्र हि नाम कुशलधर्मा बोधिपक्षाः श्रावकधर्माः प्रत्येकबुद्धधर्मा बोधिसत्त्वधर्मा बुद्धधर्मा इति। यतो प्रज्ञापारमितायामन्तर्गता अनुप्रविष्टाः संग्रहसमवसरणं गच्छन्ति।

भगवानाह - अत्यन्तमुक्तत्वात् सुभूते प्रज्ञापारमिता।

सुभूतिराह - अहो ! अहो ! दुरवगाहा वतेयं प्रज्ञापारमिता।

भगवानाह - अत्यन्तविशुद्धत्वात् सुभूते प्रज्ञापारमिता।

सुभूतिराह - अहो ! अहो ! दुरवगाहा वतेयं भगवन् प्रज्ञापारमिता।

भगवानाह - अत्यन्तशुद्धत्वात् सुभूते प्रज्ञापारमिता, तस्मात्तर्हि सुभूते आकाशोपमा प्रज्ञापारमिता।

सुभूतिराह - अहो ! अहो ! दुरवगाहा वतेय प्रज्ञापारमिता भगवन् अभियुक्तेन।

भगवानाह - एवमेव तद्यथा वदसि। दुरधिमोचा प्रज्ञापारमिता अनभियुक्तेन परीतकुशलमूलेन दुर्मेधस अनाविलेन[६] सुभूतिना। नहि न यद्येन पापमित्रसहितेन पापमित्रसवर्गेण बहुलेन पापमित्रसमादयेन सद्धर्मान्तिक समन्वागतेन आदिकर्मिकेण अत्यन्तरूपेण अपरिपृच्छकजातीयेन दुष्प्रज्ञसंवर्त्तनीयेन कुसीदेन हीनसत्त्वेन नाधिमुक्तेन कुशलेषु धर्मेषु अनभियुक्तेन तस्यैव हि सुभूते दुरधिमोचां प्रज्ञापारमितामुच्यते।

---

[२] इत्यष्टादशशून्यताः।

[३] इति सप्तत्रिंशद् बोधिपाक्षिक धर्माः।

[४] सर्वज्ञताया

[५] चर

[६] अनाविकेन

पुनरपरं सुभूते यः कश्चित् कुलपुत्रो वा कुलदुहिता वा इमां प्रज्ञापारमितां गंभीरां भाषन्ति धारयि[७] वाचयि[८] देशयि[९] पर्यवाप्स्यन्ति सोऽतीतानागतप्रत्युत्पन्नानां भगवतां बुद्धबोधिं बोधिसत्त्वा धारयिष्यन्ति[१०]। तस्मात्तर्हि सुभूते अध्याशयेन भिक्षवोऽनुत्तरायां सम्यक्सम्बोधिकामेनाभिज्ञाय प्रज्ञापारमिता उद्गृहीतव्या।

इदमवोचद् भगवानात्तमना सा च सर्वावती पर्षदीयं भगवतो भाषितमभिनन्दन्निति।

॥ अद्वयशतिका प्रज्ञापारमिता धारणी सूत्र समाप्ता ॥

---

[७] धारयिष्यन्त

[८] वाचयिष्यन्ति

[९] देशयिष्यन्ति

[१०] भगवान् बोधिसत्त्वो धारयिष्यन्ति